श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवरवरमुनिभिः अनुगृहीता

# ॥ श्रीयतिराजविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीयतिराजविंशतिः ॥

यः स्तुतिम् यतिपति प्रसादिनीं
    व्याजहार यतिराजविंशतिम्।
तं प्रपन्नजन चातकाम्बुदं
    नौमि सौम्यवरयोगिपुङ्गवं ॥

श्रीमाधवाङ्घ्रि जलजद्वय नित्यसेवा
    प्रेमाविलाशय पराङ्कुश पादभक्तम्।
कामादिदोष हरमात्मपदाश्रितानाम्
    रामानुजं यतिपतिं प्रणमामि मूर्ध्ना॥ १॥

श्रीरङ्गराजचरणाम्बुज राजहंसं
    श्रीमत्पराङ्कुश पदाम्बुजभृङ्गराजं।
श्रीभट्टनाथ परकाल मुखाब्जमित्रं
    श्रीवत्सचिह्न शरणं यतिराजमीडे॥ २॥

वाचा यतीन्द्र! मनसा वपुषा च युष्मत्
    पादारविन्दयुगळं भजतां गुरूणाम् ।
कूराधिनाथ कुरुकेशमुखाद्यपुंसां
    पादानुचिन्तनपरस्सततं भवेयम्॥ ३॥

नित्यम् यतीन्द्र! तव दिव्यवपुस्स्मृतौ मे
    सक्तं मनो भवतु वाक् गुणकीर्तनेऽसौ।
कृत्यञ्च दास्यकरणे तु करद्वयस्य
    वृत्त्यन्तरेऽस्तु विमुखं करणत्रयञ्च॥ ४॥

अष्टाक्षराख्य मनुराज पदत्रयार्थ
    निष्ठां ममात्र वितराद्य यतीन्द्र नाथ!।

शिष्टाग्रगण्यजन सेव्यभवत्पदाब्जे
हृष्टाऽस्तु नित्यमनुभूय ममास्य बुद्धिः॥ ५ ॥

अल्पाऽपि मे न भवदीय पदाब्जभक्तिः
शब्दादिभोग रुचिरन्वहमेधते हा।
मत्पापमेव हि निदानममुष्य नान्यत्
तद्वारयार्य यतिराज! दयैकसिन्धो!॥ ६ ॥

वृत्त्या पशुर्नरवपुस्त्वहमीदृशोऽपि
श्रुत्यादिसिद्ध निखिलात्मगुणाश्रयोऽयम्।
इत्यादरेण कृतिनोऽपि मिथः प्रवक्तुं
अद्यापि वञ्चनपरोऽत्र यतीन्द्र वर्ते॥ ७ ॥

दुःखावहोऽहमनिशं तव दुष्टचेष्टः
शब्दादिभोग निरतश्शरणागताख्यः।
त्वत्पादभक्त इव शिष्ट जनौघमध्ये
मिथ्या चरामि यतिराज ततोऽस्मि मूर्खः॥ ८ ॥

नित्यं त्वहं परिभवामि गुरुं च मन्त्रं
तद्देवतामपि न किञ्चिदहो बिभेमि।
इत्थं शठोऽप्यशठवत् भवदीयसङ्घे
हृष्टश्चरामि यतिराज ततोऽस्मि मूर्खः॥ ९ ॥

हा हन्त हन्त मनसा क्रियया च वाचा
योऽहं चरामि सततं त्रिविधापचारान्।
सोऽहं तवाप्रियकरः प्रियकृद्वदेव
कालं नयामि यतिराज! ततोऽस्मि मूर्खः॥ १० ॥

पापे कृते यदि भवन्ति भयानुताप
लज्जाः पुनः करणमस्य कथं घटेत।
मोहेन मे न भवतीह भयादिलेशः
तस्मात्पुनः पुनरघं यतिराज! कुर्वे॥ ११ ॥

अन्तर्बहिस्सकलवस्तुषु सन्तमीशं
अन्धः पुरस्स्थितमिवाहमवीक्षमाणः।
कन्दर्पवश्य हृदयस्सततं भवामि
हन्त! त्वदग्रगमनस्य यतीन्द्र! नार्हः॥ १२॥

तापत्रयीजनित दुःखनिपातिनोऽपि
देहस्थितौ मम रुचिस्तु न तन्निवृत्तौ।
एतस्य कारणमहो! मम पापमेव
नाथ! त्वमेव हर तद्यतिराज! शीघ्रं॥ १३॥

वाचामगोचर महागुण देशिकाग्र्य
कूराधिनाथ कथिताखिल नैच्यपात्रं।
एषोऽहमेव न पुनर्जगतीदृशस्तत्
रामानुजार्य! करुणैव तु मद्गतिस्ते॥ १४॥

शुद्धात्म यामुनगुरूत्तम कूरनाथ
भट्टाख्य देशिकवरोक्त समस्तनैच्यम्।
अद्यास्त्यसङ्कुचितमेव मयीह लोके
तस्माद्यतीन्द्र! करुणैव तु मद्गतिस्ते॥ १५॥

शब्दादिभोगविषया रुचिरस्मदीया
नष्टा भवत्विह भवद्दयया यतीन्द्र!।
त्वद्दासदासगणना चरमावधौ यः
तद्दासतैकरसताऽविरता ममास्तु॥ १६॥

श्रुत्यग्रवेद्य निजदिव्यगुणस्वरूपः
प्रत्यक्षतामुपगतस्त्विह रङ्गराजः।
वश्यस्सदा भवति ते यतिराज! तस्मात्
शक्तस्स्वकीयजन पापविमोचने त्वम्॥ १७॥

कालत्रयेऽपि करणत्रय निर्मिताति
पापक्रियस्य शरणं भगवत्क्षमैव।

सा च त्वयैव कमलारमणेऽर्थिता यत्
क्षेमस्स एव हि यतीन्द्र! भवच्छ्रितानाम्॥ १८ ॥

श्रीमन्! यतीन्द्र! तव दिव्यपदाब्जसेवां
श्रीशैलनाथ करुणापरिणामदत्ताम्।
तामन्वहं मम विवर्धय नाथ! तस्याः
कामं विरुद्धमखिलं च निवर्तय त्वम्॥ १९ ॥

विज्ञापनं यदिदमद्य तु मामकीनं
अङ्गीकुरुष्व यतिराज! दयाम्बुराशे।
अज्ञोऽयमात्म गुणलेश विवर्जितश्च
तस्मादनन्यशरणो भवतीति मत्वा॥ २० ॥

इति यतिकुलधुर्यमेधमानैः
श्रुतिमधुरैरुदितैः प्रहर्षयन्तं।
वरवरमुनिमेव चिन्तयन्ती
मतिरियमेति निरत्ययं प्रसादम्॥ २१ ॥

॥ इति श्रीयतिराजविंशतिः समाप्ता ॥